# Shri Ganesha Stotram Somadattakritam

# સોમદત્તકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Somadattakritam

File name : gaNeshastotramsomadattakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 21 | 8.21 61-78||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# સોમદત્તકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

સોમદત્ત ઉવાચ ।

ગણેશાય પરેશાય સદા શાન્તિપ્રદાયિને ।

યોગિનાં યોગરૂપાય હૃદિસ્થાય નમો નમઃ ॥ ૬૧॥

વિઘ્નેશાય મહાવિઘ્નવિઘ્નદાય પરાત્મને ।

વિઘ્નહર્ત્રે સ્વભક્તાનાં સત્તાધારાય તે નમઃ ॥ ૬૨॥

અનાદયે મહાકાલ કાલાય કાલરૂપિણે ।

અન્તે વિહારયુક્તાયાદિનાથાય નમો નમઃ ॥ ૬૩॥

વિનાયકાય દેવાય સર્વેષાં નાયકાય ચ ।

નાયકેભ્યઃ પદાદીનાં દાત્રે તુભ્યં નમો નમઃ ॥ ૬૪॥

લમ્બોદરાય સર્વેષામુદરસ્થાય તે નમઃ ।

અપારોદારભાવાય બ્રહ્મેશાય નમો નમઃ ॥ ૬૫॥

આદિમધ્યાન્તહીનાય તદાકારસ્વરૂપિણે ।

સ્વાનન્દપતયે તુભ્યં સ્વસંવેદ્યાય તે નમઃ ॥ ૬૬॥

સિદ્ધિદાત્રે સુભક્તેભ્યો દુષ્ટાનાં સિદ્ધિહારિણે ।

સિદ્ધિપતે મહાસિદ્ધિરૂપાય તે નમો નમઃ ॥ ૬૭॥

બુદ્ધિપતે સુબુદ્ધીનાં દાત્રે સાધુજનપ્રિય ।

દુર્બુદ્ધિદાયિને તુભ્યં દુષ્ટેભ્યો વૈ નમો નમઃ ॥ ૬૮॥

સમ્પ્રજ્ઞાતસ્વરૂપાયાસમ્પ્રજ્ઞાતં મહાશિરઃ ।

તયોર્યોગે નરાકાર ગજાકારાય તે નમઃ ॥ ૬૯॥

કિં સ્તૌમિ ગણનાથ ત્વાં સદા યોગસ્વરૂપિણે ।

અતસ્તે નમનં કૃત્વા કૃતકૃત્યો ભવામ્યહમ્ ॥ ૭૦॥

ધન્યોઽહં સર્વભૂતેષુ ત્વાં દૃષ્ટ્વા ગણનાયકમ્ ।

કુલં શીલં યશો ધન્યં જનકૌ તપ આશ્રમઃ ॥ ૭૧॥

ધન્યં વ્રતં ગણાધીશ મહત્ કાર્તિકમાસગમ્ ।

તસ્યાચરણમાત્રેણ ત્વં મે દૃષ્ટિગતઃ પ્રભો ॥ ૭૨॥
ભક્તિં ત્વદીયપાદેષુ દેહિ મે દ્વિરદાનન ।
નાન્યદ્યાચે ભ્રમૈર્યુક્તં ગાણપત્યપરાયણઃ ॥ ૭૩॥
તસ્ય તદ્વચનં શ્રુત્વા ગણેશસ્તમુવાચ હ ।
યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ॥ ૭૪॥
ગાણપત્યપ્રિયોઽત્યન્તં ભવિષ્યસિ મહામુને ।
ભક્તો મદીયપાદસ્ય સર્વમાન્યો ભવિષ્યસિ ॥ ૭૫॥
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ નૃણાં વિપ્ર પઠતાં શ ृણ્વતાં સદા ॥ ૭૬॥
એવમુક્ત્વાંઽતર્દધેઽસૌ વિઘ્નેશઃ કરુણાનિધિઃ ।
સોમદત્તો મહાભાગો ગૌતમં પ્રણનામ હ ॥ ૭૭॥
તદાદિ સ મુનિઃ ખ્યાતો બભૂવ ગણપપ્રિયઃ ।
યોગી યોગવિદાં શ્રેષ્ઠઃ સર્વવેદાર્થતત્ત્વવિત્ ॥ ૭૮॥

ઇતિ સોમદત્તકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૨૧ । ૮.૨૧ ૬૧-૭૮॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 21 . 8.21 61-78..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganesha Stotram Somadattakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*